पक्षज्ञयोर्वादिनोवाहिनोर्वैविवादभुवोभवंति ऊर्वेतिचेवामुहोरात्मनोहेनस्मैनमोनं
तद्गुणरूपभक्तेः ३१ अस्तीतिनास्तीतिचवस्तुनिष्ठयोरेकस्थयोर्भिन्नविरुद्धधर्मयोः
अवतिष्ठतेकिंचनयोगसांख्ययोः समंपरंयत्तदृहत्तत्त ३२ योनुग्रहार्थंभजतां
पादमूलमनामरूपोभगवाननंतः नामानिरूपाणिचजन्मकर्मभिर्भेजेसमह्यंप
टपतिभिन्नावस्तिनास्तीत्युक्तंभूतोविरुद्धोपर्मौययोस्तयोर्भिन्नविषयत्वेविरोधोनस्यादित्येकः
स्थयोरित्युक्तं एकविषययोःऊनः वस्तुनिष्ठयोः पादादिविधिप्रतिषेधयोः एकवस्तुनिष्ठता
त समत्वेहेतुःपरं हियतोविधिप्रतिषेधयोरविषयत्वयोःपादादिविसर्पत्वात् नहितत्राविषय
पस्यसद्भावेकिंप्रमाणंतदाह अनत्कलमभिष्ठानेविनापादादिकल्पनायोगात् अवधि
विनानविषयायोगाच्च नयोरुपपादकत्वेनसिद्धमित्यर्थः तस्मैनमइतिपूर्वेणान्वयः नन्
दासीनस्यसमस्तसंस्कारकालोभकत्वात्तदाह यइति पादमूलंभजतामनुग्रहार्थंप्राकृतनामरूप
रहितोपिननमाभिरवतारैर्विशुद्धानितमनामानिरूपाणिकर्मभिर्नामानिचभक्तोभजेतेन ज्ञेना

17

श्री
भा॰ पं॰
टी॰
८

ननु त्वादृशाः सकामा भागवतादीन प्रार्थयन्ते तेन तान्विहाय किमिति भगवन्तमेव प्रार्थयसे तत्रा
ह प्राकृतैरेवाचीनैर्गुणैर्नपृथक्समासन्नानामात्मा यथाशयं तत्तद्वासनानुसारेण देहगतो न्तर्यामी।
तत्तद्देवतारूपेण विविधो भाति यथा वायुः पार्थिवं चपकादिगंधभेदमाश्रित्य नानाभोगवान
विभाति तैरेवं गुणप्रधान स्वरसादिकमाश्रित्य नानारूपवान्प्रतीयते न तु ते स्वयं तत्तद्देवतारूप
णाफलदातृत्वेन सर्वेश्वरएव मममनोरथं सम्पूर्णं करोतु किमेभिर्देवनानैरित्यर्थः तदुक्तंगी।
तासु योयोयांयांतनुं भक्तः श्रद्धयार्चितुमिच्छति तस्य तस्याचलां श्रद्धां तामेव विदधाम्यहं स
यः प्राकृतैस्तैर्नपृथग्नानात्वं यथाशयं देहगतो विभाति यथानिलः पार्थिवमाश्रितो
गुणं स ईश्वरो मे कुरुतान्मनोरथं २४ एवं स्तुतः स भगवान्वत्स भक्तवत्सल
अविर्बभूव कृष्णो भगवान्भक्तवत्सलः २५ स्थितपादः सुपर्णांसे प्रलंबाष्टमहाभुजः
चक्रशंखासिचर्मेषुधनुःपाशगदाधरः २६ पीतवासा घनश्यामः प्रसन्नवदने
क्षणः वनमालानिवीताङ्गो लसच्छ्रीवत्सकौस्तुभः २७ महाकिरीटकटकः
स्फुरन्मकरकुण्डलः काञ्च्यङ्गुलीयवलयनूपुराङ्गदभूषितः २८
नयाश्रुत्युक्तेः तस्याराधनमीहते लभते च ततः कामान्मयैव विहितान्हि तानिति ये यथा
मां प्रपद्यन्ते तांस्तथैव भजाम्यहमिति चेति २४ संस्तुवतोदक्षस्य स भगवान्प्रत्यक्षोऽभूत २५
ते व्याख्याति मार्थेश्रुतिभिः सुपर्णांसे सं वेदकृतोपादीयेन प्रलंबा लम्बमाना महान्तो भुजा
यस्य चक्रशंखश्रुषधरः २६ प्रसन्ने वदनमीक्षणे च यस्य वनमालया निवीतं वेष्टितमंगं यस्य
लसन्तौ श्रीवत्सकौस्तुभौ यस्य २७ महान्ति किरीटकटकानि यस्य स्फुरे
तीमकरकुण्डले यस्य काञ्च्यादिभिर्विभूषितः वलयमनन्तपादभूषणंमिश्रं कटकास्पाकनां

८
न. ३९

17A

त्रैलोक्यमोहनं श्रीपुरुषोत्तमस्य सुरयूथपैर्लोकपालैः ४१ आपूरितानि मनोद्वाराणि इन्द्रियाणि तै
र्यथा ह्रदिन्या नद्या निर्झरैरापूर्यते तथा महानन्दापूर्णत्वेनावृत्तिकत्वात् वागादीनां न किंचित्
निःसरतीत्यर्थः यद्यप्येतानि वाचितव्यानि तथापि चित्तज्ञः देवस्तमाह ४१ भवं भक्तिगतः ४३ यच्छ

त्रैलोक्यमोहनं रूपं बिभ्रत्त्रिभुवनेश्वरः वृतो नारदनन्दाद्यैः पार्षदैः सुरयूथपैः ३९ स्तू
यमानोऽनुगायद्भिः सिद्धगंधर्वचारणैः रूपं तन्महदाश्चर्यं विचक्ष्यागतसाध्वसः ४० न
नाम दंडवद्भूमौ प्रहृष्टात्मा प्रजापतिः न किंचनोदीरयितुमशकत्तीव्रया मुदा ४१
आपूरितमनोद्वारैर्ह्रदिन्य इव निर्झरैः तं तथावनतं भक्तं प्रजाकामं प्रजापतिं ४२ चि
त्तज्ञः सर्वभूतानामिदमाह जनार्दनः श्रीभगवानुवाच प्राचेतस महाभाग संसिद्धस्त
पसा भवान् यच्छ्रद्धया मत्परया मयि भावं परं गतः ४३ प्रीतोऽहं ते प्रजानाथ यत्तेस्यो
द्बृंहणं तपः ममैष कामो भूतानां यद्भूयासुर्विभूतयः ४४ ब्रह्मा भवो भवंतश्च मनवो
विबुधेश्वराः विभूतयो मम ह्येता भूतानां भूतिहेतवः ४५

तस्य तपः अस्य विश्वस्य उद्बृंहणं वृद्धिकरं यत्ते तपः तेनाहं प्रीतः मत्तः प्रसादलाभार्थं त्वत्तपो
नेः किं कारणं तत्राह ममेति भूतानां विभूतयः समृद्धयो भूयासुरिति यत् एष एव मम कामः
अतो मत्कामसंपादनात्त्वाहं प्रीतोऽस्मीत्यर्थः ४४ विभूतिविस्तारप्रयत्नश्च तवोचित एवेत्याह
ब्रह्मेति भवंतः प्रजापतयः भूतेरुद्भवस्य हेतवः ४५ ॥

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

विश्वसृड्भ्यो येन तत्तपसा दृष्टीतमभ्युक्तं तदेव तपः स्तुवन् प्रसंगादन्यान्यपि लोकवृद्धिकराणि वि
द्यादीनि साधनानि तपः यमनियमादिसहितं ध्यानं मे हृदयं विद्या सांगमंत्रजपः सा मे तनुस्तनोमी
ति तनुर्देहः क्रिया ध्यानादिविषयः शुभ्रा पारोभावना शास्त्रं वाच्यः तेनाहं ध्यानादिकमा
क्रियते इत्याकृतिः जाताः स निष्पन्नाः क्रतवो अंगानि शिरो वा एतद्यत्प्रवर्ग्यो ग्रीवा उपसदः
तथा प्राणादिभागा वित्याद्यश्रुतेः धर्मः स्वमनाद्यष्टवेधात्मा मनः हृदयाश्रयत्वात् सुरा यज्ञभुज

तपो मे हृदयं ब्रह्मंस्तनुर्विद्या क्रियाकृतिः अंगानि क्रतवो जाता धर्म आत्मासवः सु
राः ४६ अहमेवासमेवाग्रे नान्यत्किंचांतरं बहिः संज्ञानमात्रमव्यक्तं प्रसुप्तमिव वि
श्वतः ४७ मय्यनंतगुणेऽनंते गुणतो गुणविग्रहः यदासीत्तत एवाद्यः स्वयंभूः समभू
दजः ४८ स वै यदा महादेवो मम वीर्योपबृंहितः मेने खिलमिवात्मानमुद्यतः स्वर्ग
कर्मणि ४९ अथ मेऽभिहितो देवस्तपोऽतप्यत दारुणं नव विश्वसृजो युष्मान्येना

स्तएव प्राणाः असवः प्राणाः संतर्पणीयत्वात् ४६ तपसः संतानवृद्धिहेतुत्वं दर्शयितुं द्वितीयतृ
तीयोक्तमिति द्वाभ्यां समाहृत्य तत्राभिः अहमेवेति वसंतत्र आवृत्तिः आसमेवेति क्रियोत्तरस्या
वृत्तिः अंतरे ग्राहकं च बहिर्ग्राह्यं संज्ञानमात्रं चैतन्यमात्रं अव्यक्तमिदं इदं परिगृहीतिभिरनभिव्यक्तं
अत एव प्रसुप्तमिव विश्वतः सर्वत्र ४७ गुणतो मायातः गुणमयो विग्रहो यस्य सोऽहं ततः स्वदे
वयज्ञः अयोनिजः ४८ खिलमसमर्थमिव ४९ मम याज्ञयतपत्प्रत्यभिहितः सन् येन तपसा

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

18A

तेन निवृद्ध्यापायसाह ऋषेति अंग हे दक्ष पंचजनाख्यस्य प्रजापतेः ५१ मिथुनस्ययोर्व्यवायोरतिः
स एव धर्मो यस्य त्वं तेन यथा भूता यो तास्या ५२ मायया निमित्तभूतया सह मिथुनीभूय भविष्यंति पु
त्रादिरूपेणोत्पत्स्यन्ते ५३ इति श्रीभावार्थप्रदीपिकायां षष्ठे चतुर्थः ४ पंचमे नारदेनाथ वाचः श्रुते
एषा पंचजनस्यांग दुहिता वै प्रजापतेः असिक्नी नाम पत्नीत्वे प्रजेश प्रतिगृह्यतां ५२
त्वं२ मिथुनव्यवायधर्मस्त्वं प्रजासर्गमिमं पुनः मिथुनव्यवायधर्मिण्यां भूरिशो भावयिष्यसि ५३
त्वत्तोऽधस्तात्प्रजाः सर्वा मिथुनीभूय मायया मदीयया भविष्यंति हरिष्यंति च मे बलिं ५४
शुकः इत्युक्त्वा मिषतस्तस्य भगवान्विश्वभावनः स्वप्नोपलब्धार्थ इव तत्रैवांतर्दधे हरिः ५५
इति श्रीभागवते षष्ठस्कंधे चतुर्थोध्यायः शुकः तस्यां स पांचजन्यां वै विष्णुमायोपबृं
हितः हर्यश्वसंज्ञानयुतं पुत्रानजनयद्विभुः १ अपृथग्धर्मशीलास्ते सर्वे दाक्षायणा
नृप पित्रा प्रोक्ताः प्रजासर्गे प्रतीचीं प्रययुर्दिशं २ तत्र नारायणसरस्तीर्थं सिंधुसमु
द्रयोः संगमो यत्र सुमहन्मुनिसिद्धनिषेवितं ३ तदुपस्पर्शनादेव विनिर्धूतमला
शयाः धर्मे पारमहंस्ये च प्रोत्पन्नमतयोप्युत ४ तेपिरे तप एवोग्रं पित्रादेशेन यंत्रिताः
प्रजाविवृद्धये यत्तान्देवर्षिस्तान्ददर्श ह ५ ॥ स्तनाशितान सुतानांकर्ण्य दक्षोसं शशा
पेति निरूप्यते १ अपृथग्धर्मशीला एकाचारस्वभावाः ३ तत्र प्रतीच्यां दिशि सिंधोर्नद्याः समुद्र
स्य च यत्र संगमस्तत्रस्थं नारायणसरो नाम तीर्थं प्रययुरित्यन्वयः समहदिति विस्तीर्णं विनिर्धू
तमलो रागादिर्येषां तान् सम्यगाशयो येषां ४ तान् प्रजासृजान्पित्रादेशनाशेन प्रजाविवृद्धयेप

भागवतटीकाषष्ठ ६ ॥

19

श्री
भा. ष.
टी.
१९

अहो मोक्षमार्गमपि कारिताः सन्ति एते प्रवृत्तिनिष्ठाः कर्मभिर्न श्रेयस्त्विति कृपया निगूढार्थैर्वाक्यै
रुपदिशन्निमस्मरत्तदाह उवाचेति चतुर्भिः पालकाः सन्तोऽपि बालिशा अज्ञाः यूयं कथं प्रजाः स्र
क्ष्यथ बतेति खेदे बालका इति पाठे बालिशा न वेदः एक एव पुरुषो यस्मिन् तद्राष्ट्रमदृष्ट्वानु
पगः बिलं चित्रादिहिनीर्गमनामविज्ञाय कथं सर्गं करिष्यथेति तृतीयेनान्वयः ७ पं
चपंचाशतो पंच विंशतेरद्भुतं गृहं येषां ततः पवित्रिभिर्वेणुश्रुतिमिव तितीर्षार्द्रं छेदन।

उवाचाथ हर्यश्वाः कथं स्रक्ष्यथ वै प्रजाः अदृष्ट्वान्तं भुवो यूयं बालिशा बत पालकाः ॥
तथैकपुरुषं राष्ट्रं बिलं चादृष्टनिर्गमं बहुरूपां स्त्रियं चापि पुमांसं पुंश्चलीपतिं ७ नदी
मुभयतो वाहां पंचपंचाद्भुतं गृहं क्वचिद्धंसं चित्रकथं क्षौरपव्यं स्वयं भ्रमि ८ कथं स्व
पितुरादेशमविद्वांसो विपश्चितः अनुरूपमविज्ञाय अहो सर्गं करिष्यथ ९ शुकः
तन्निशम्याथ हर्यश्वा औत्पत्तिकमनीषया वाचः कूटं तु देवर्षेः स्वयं विममृशुर्धिया ॥
भूः क्षेत्रं जीवसंज्ञं यदनादि निजबन्धनं अदृष्ट्वा तस्य निर्वाणं किमसत्कर्मभिर्भवेत् ॥

र्थः स्वयमनन्तं भ्रमणस्वभावं ८ विपश्चितः सर्वज्ञस्य स्वपितुरादेशमात्मनोऽनुरूपम
विद्वांसः जानन्तः शर्वाङ्गं चैकपुरुषं राष्ट्रमित्याद्यविज्ञाय अहो कथं सर्गं करिष्यथेत्यन्वयः
वाचः कूटं परोक्षवादेनार्थान्तरमिव प्रतीयमानं वचनं औत्पत्तिकी सहजा मनीषा विचारश
क्तिर्येषां तथाभूताः स्वयमेव विममृशुः विचारितवन्तः १० नारदोक्तदृष्टान्तवाक्यानां तत्त्वविषय
लिङ्गितानार्थानाहुः एकादशभिः अदृष्ट्वान्तं भुव इत्यस्यार्थमाह भूरिति क्षेत्रं जीवसंज्ञं
लिङ्गशरीरं यत् निजबन्धनमात्मनो बन्धकारणं अन्तं शब्दार्थमाह असद्भिर्मोक्षानुपयोगिभिः क

५

19A

एकपुरुषमित्यस्यार्थमाह एकएवेति तर्पः सर्वसाक्षी साश्रयः साधारः अभवेतित्यनुक्तं अ
सङ्गोस्वगतसमर्पितैः कर्मभिः ५ विलेचारदर्शनिर्गममित्यस्यार्थमाह पुमान्स्वङ्गत्वाप्राप्य विल
सर्गपातालेगत इवनेवृत्तिना वर्तते तेनसम्यक् अभयज्योतीरूपब्रह्मप्रविष्टः प्रविष्टुषः असद्भिर्नैष्व
स्वर्गादिसाधनैः कर्मभिः ६ बहुरूपांस्त्रियमित्यस्यार्थमाह नानारूपेति सैरिणीपुंश्चलीवधि
मोहकारजस्तमआदिगुणोररचिता तन्निष्ठांतस्याअवसाने विवेके प्रगतस्याप्राप्तस्य असद्भिरेषातैः ७
पुंमांसं पुंश्चलीपतिमित्यस्यार्थमाह तस्याः संगेन भ्रंशितैश्वर्यं स्वातंत्र्यमपत्वं निरताभार्याय
स्यनद्धेत तस्यागतीः सर्वेदुःखिलक्षणाः संसारेतेजीवमबुधस्यार्थमाह तस्यासंगेनभ्रंशजान

एकएवस्वरूपस्तयोभगवानस्याश्रयः परः तमदृष्ट्वाभवेद्बुधः किमसत्कर्मभिर्भवेत ६
पुमाञ्जैव नियंत्वा विलसंगेनतोयथा प्रत्यग्धामाविदुद्भुह किमसत्कर्मभिर्भवेत ७
नानारूपात्मनोबुद्धिः सैरिणीवगुणान्विता तन्निष्ठामगतस्येह किमसत्कर्मभिर्भवेत ७
तत्संगभ्रंशितैश्वर्यं संसरंतं कुभार्यवत् तद्गतीरबुधस्येह किमसत्कर्मभिर्भवेत ५ सृ
ष्टाप्ययकरीं मायां वेलाकूलांतवर्गितां मत्तस्यतामविज्ञस्य किमसत्कर्मभिर्भवेत ६ ॥

तत्रमदिवृद्धि विवेकपात्रः ७ नदीमभयतोवाहामित्यस्यार्थमाह सृष्ट्याप्ययोकरोतीत्युभ
पतः प्रवाहदर्शनात् वेलाकूलेप्रवाहपतिता तोनिर्गमस्यानेत्तपोविद्यादितस्याततेसमीपेवेदी
तोनिर्गमप्रतिबंधायकोपाद्यहंकारादिभिः कृतवेगामतस्तत्तद्वेगातविवशस्य अतएवतोत
याभ्यंतरेमविज्ञस्य अविचारयतः असद्भिर्माधिकैः यद्वा वेलाकूलसमस्यव्यवहारस्थाने
तत्समीपेसमुद्वृद्धिद्विहासाभ्यां यथा उभयोरंतर्वेदिः कृतवेगानदीभवति एवंसद्रूपस्या

नौव्यवहारस्थाने देहे जन्ममरणादिभिः कृतवेगामित्यर्थः वेगि
नीमिति पाठे वेगवती १९

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

श्री पंचपंचेत्यस्यार्थमाह पंचविंशतितत्त्वात्मा पुरुषोऽन्तर्यामी अद्भुतदर्पणोऽथाश्चर्यरूपश्चाश्रयः
भा ४ प्रधानात्मकार्यकारणसंघाताधिष्ठातारोऽनेन समबुधस्यग्रसङ्गिः मिथ्याभासात्तेऽप्यहते: ७ कुविंदे
टी समित्यस्यार्थमाह ऐश्वरप्रतिपादकं विविक्तं पदं विजुत्स्वरूपं वस्तु येन तद्दृशं पदं व्याख्यानेन वेपमा
२० त्वावत्रुस्यायतीति तथाग्रेनेन विज्ञाः कथा यस्येति व्याख्यानं तडतस्य ग्रनभ्यस्य ग्रज्ञाय अ·
विद्वेषग्राहिवेदिभिर्मुवे: ८ तौरप व्याप्रमित्यस्यार्थमाह कालचक्रमिति भ्रमिभ्रमिणात्म·
केनोत्तमिति निष्कर्षयतीति दिवसेतौरपव्ययपदं व्याख्यानं नटदत्तयस्यग्रत्तएवफलस्य निम

पंचविंशतितत्त्वानां पुरुषोऽद्भुतदर्पणः अध्यात्ममबुधस्येह किमसत्कर्मभिर्भवेत् १७
ऐश्वरं शास्त्रमुत्सृज्य बन्धमोक्षानुदर्शनं विविक्तपदमज्ञाय किमसत्कर्मभिर्भवेत् १८
कालचक्रं भ्रमिस्तीक्ष्णं सर्वं निष्कर्षयज्जगत् स्वतंत्रमबुधस्येह किमसत्कर्मभिर्भ·
वेत् १९ शास्त्रस्य पितुरादेशं यो न वेद निवर्तकं कथं तदनुरूपाय गुणविस्रम्भ्युपक्रमे २०
त. २० इति व्यवसिता राजन् हर्यश्वा एकचेतसः प्रययुस्तं परिक्रम्य पन्थानमनिवर्तनं

नबुद्ध्वाकाम्यकर्मानुष्ठाने तेपुण्यवाङ्गस्याटसङ्गिः १८ शास्त्रस्य पितुरादेशमित्यस्यार्थमाह शास्त्र
समस्तस्त्यानपितुद्वितीयजन्मदेत्वात्तिरत्नेरूपाय निवर्तनरूपाय निवर्तकमादेशं यो न वेद स
कथं गुणविस्रम्भी गुणमयप्रवृत्तिमार्गे विश्वासवान् सन् उपक्रमेत् स्वर्गादौ प्रवर्तेत मोदे·
शास्त्रस्य बुद्धीनो जीवमापातरमणान्नो शास्त्रकालोपदेशानामज्ञाने किमसत्कर्मभिः इति वा·
वः हृदंसग्रहश्लोकः २० इति व्यवसिताः एवं निश्चितवन्तः एकचेतसः एकमतयुक्ताः तेना
रदप्रदक्षिणीकृत्य अपुनरावृत्तिमार्गं प्रययुः २१ ॥

निर्भीतः साक्षात्कृतो यो हृषीकेशः तस्य पादांबुजे अनुचरन् अनुचरन्नित्यर्थः २१ नारायणमर्दनेत्वधर्म
संसंगं चर्मीलितनयनेन भ्रमिते ऽवितथानेशोकः दृष्टः स प्रजानां सन्तु च वने मुचांशोकान्तोनां।
स्थानं २२ अनेन अशेषप्रणवंब्रह्मसमाप्राणमंत्रेण वा २३ इडस्पतिं वाचा मंत्राणांपतिं विस्माराध

सर्वस्याणि निर्भीतस्तस्थीकेशपदांबुजे अनुलंरचित्तमावेश्य लोकाननुचरन्मुनिः २१
नारदेनिशम्यपुत्राणांसत्त्वनारदाद्धौलशालिनां अनन्तप्यतकः शोचन्प्रजानांमुचापदे २२
य सभूयोजनयामासनेनयपरिसांवितः पुत्रानमत्तपदक्षः सवलाश्वसहस्रशः २३ तेपि
पित्रासमादिष्टाः प्रजासर्गेधृतव्रताः नारायणसरोवामयत्रसिद्धाःस्वपूर्वजाः २४ तदुप
स्पर्शनादेवविनिर्धूतमलाशयाः जपंतोब्रह्मपरमंतेपुस्तत्रमहत्तपः २५ अब्भक्षाःक
तिचिन्मासान्कतिचिद्वायुभोजनाः आराधयन्मंत्रमिमममभ्यस्यंतइडस्पतिं २६ ॐन
मोनारायणायपुरुषायमहात्मने विशुद्धसत्त्वधिष्ण्यायमहाहंसायधीमहि २७
इतितानपिराजेन्द्रप्रतिसर्गधियोमुनिः उपेत्यनारदः प्राहवाचःकूटानिपूर्ववत् २८ दा
शायणाः संसृणुतगदतोनिगमंमम अन्विच्छतानुपदवींभ्रातॄणांभ्रातृवत्सलाः ३०
भ्रातॄणांप्रायणंभ्रातायोनुतिष्ठतिधर्मवित् सपुण्यबंधुःपुरुषोमरुद्भिःसहमोदते ३१

यामासः २० विशुद्धसत्त्वासु परमहंसायनमो धीमहि २८ प्रतिसर्गे धीर्येषां तान् वाचः कूटा
नि अपहृदयंतं भुव इत्यादीनि पूर्वोक्तानि प्राह २९ हे दाशायणाः संसृणुतेत्यादि पुनरपदविमाह
निगमं पुपदेशं अन्विच्छत अवलोकयत ३० प्रायणं मार्गं गमनं प्रायणमेव वंद्धयंस मरुद्भिर्भो

21

श्री॰ भाग॰ टी॰ २१

अमोघदर्शनस्य देशाटिनस्यार्थ ३२ सध्रीचीनं समीचीनं प्रसादहतिलभ्यं अनुपथं अनुगुणं पंथानं प
श्चिमायामिनीः गताः रात्रय इव ३३ पुत्राणां पारमहंस्यनिष्ठामुपश्रुत्य दक्षोपिप्रायशोविरक्तः
स्माद्धिनितरामनुग्रहार्थं देवर्षिः तत्पार्श्वे गतः तदा तमुपलभ्य दक्ष आह ३५ साधोरिवलिंगेन वेषेणाप
सतेन त्वया नोस्मदीयानामर्भकानामसाधुकार्यकृतं तदेवाह साधूनां स्वधर्मे प्रवृत्तानां भिक्षो
यो मार्गः संप्रदर्शितः ३६ ननु संन्यासिनां मार्गः साधुरेव मोक्षहेतुत्वात्तत्र ऋणत्रयापाकरण

एतावदुक्ताप्रयोजनारदो मोहदर्शनः तेपिज्ञानगमनमार्गेभ्यात्मानमेव मारिष ३७ स
ध्रीचीनं प्रतीचीनं परस्यानुपथं गता नाद्यापि ते निवर्तंते पश्चिमा यामिनीरिव ३३
एतस्मिन्काल उत्पातान्बहून्पश्यन्प्रजापतिः पूर्ववन्नारदकृतं पुत्रनाशमुपाशृणोत्
चुक्रोध नारदायासौ पुत्रशोकविमूर्छितः देवर्षिमुपलभ्याह रोषाद्विस्फुरिताधरः
दक्ष उवाच अहो असाधो साधूनां साधुलिंगेन नस्त्वया असाध्वकार्यर्भकाणां भिक्षो
मार्गः प्रदर्शितः ३९ ऋणैस्त्रिभिरमुक्तानाममीमांसितकर्मणां विघातः श्रेयसः पा

विनानुमहाननर्थ एवेत्याह ऋणैरिति जायमानो वै ब्राह्मणः त्रिभिरृणवान् जायते ब्रह्मचर्
येण ऋषिभ्यो यज्ञेन देवेभ्यः प्रजया पितृभ्य एष वा अनृणो यः पुत्री यज्वा ब्रह्मचारी चासीदिति
श्रुतेः ऋणैरमुक्तानाममीमांसितानि विचारितानि कर्माणि यैस्तेषां तावदृणविमोक्षणा।
स्मितदुत्तरकालभावित्वाच्च पुत्रोत्पादनयज्ञानुष्ठानयोरभावेन पितृदेवर्षिऋणान्विमुक्ति
श्च नास्ति अतो हेयापवर्गविषयभोगत्यागात् इहलोके श्रेयसो विघातः कृतः मोक्षानधिकारि
त्वाच्च परलोके श्रेयसो विघातः कृत इत्यर्थः तथा च मनुः ऋणानि त्रीण्यपाकृत्य मनो मोक्षे

३२ ॥ ३३ ॥

पलोकयोरुभयोः कृतः ३९

वालानांमतिंपुत्रादिविषयांभिनत्तीति तथा एवंनिरपक्रोशोनिर्घृणः हरयशोनाशकःसन ता
त्पार्षदानांमध्येकथंचरसि ३८ निर्लज्जत्वमेवाह ननुत्वामृतेभागवताः सर्वेभूतानुग्रहपरवशाः
त्वंतुभूतानांविप्रियंकुर्वंत कथंनलज्जसइतिभावः ३९ ननुवैराग्यायउपशमः उपशमाच्चमुक्तिः
स्नेहपाशच्छेदनंभवति नचविरक्तस्यकरणंत्रपापाकरणमात्रमुपकारः पदेहेरवविरजेत्तदहेरवप्र
व्रजेत्तदहरेवप्रव्रजेन यदहरेवविरजेत्तदहरेवप्रव्रजेदित्यादिश्रुतेः अतोवैराग्योपदेशेन

एवंत्वंनिरपक्रोशोवालानांमतिभिद्धरेः पार्षदमध्येचरसियशोहानिरपत्रपः ३८
ननुभागवतानित्यंभूतानुग्रहकातराः ऋतेत्वांसौहृदघ्नंवैवैरंकरमवैरिणां ३९ नेत्थं
पुंसांविरागःस्यात्त्वयाकेवलिनामृषा मन्यसेयद्युपशमंस्नेहपाशनिकृंतनं ४० ना
नुभूयनजानातिपुमान्विषयतीक्ष्णतां निर्विद्यतेस्वयंतस्मान्नतथाभिन्नधीःपरैः ४१
यन्नस्त्वंकर्मसंधानांसाधूनांगृहमेधिनां कृतवानसिदुर्मर्षंविप्रियंतवमर्षितम् ४२

ननुतेषामप्यनुग्रहएवकृतइतिचेत्तत्राह नेति यद्यपित्वमेवंमन्यसे तथापिमृषाकेवलिनाज्ञानंवि
नाअनुभूयप्रत्युपदेशेनत्वयाअसंयमतिचालनेकृतेपिपुंसोविरागोनेवस्यात् नचविरागंविनाउप
शमःनचतेनविनास्नेहपाशनिकृंतनमित्यर्थः ४० इत्थंविरागोनस्यादित्यत्रहेतुमाह नानुभूयेति
ननुभूयविषयाणांतीक्ष्णतांदुःखहेतुत्वंनजानाति तस्माद्विषयानुभवेनतीक्ष्णत्वज्ञानात् ४१ यत
स्त्वयाऽस्माकमप्रियमेवकृतं तथापिवयंनक्रुध्यामहइत्याह यदिति कर्मसंधानांकर्ममर्यादानांक
र्मसंधानामितिपाठेविप्रियंकर्त्तुमजानतामित्यर्थः दुःसहंयत्त्वंकृतवानसि तन्मर्षितंसोढम् ४२

22

श्री · भा · ष · टी · २२

तथापितवाभद्रंभविष्यतीत्याह तंतुकृंतनसंतानच्छेदक यद्यस्मात् अभद्रंपुत्राणांस्थानभ्रंशरूपदेस्या
तेभवेदितिमूढदुःखलेनशापः ४१ वादंतस्येतिस्वीकृतवान् ईश्वरोपिप्रतिशप्तुंसमर्थोपितितिक्षतेन
सहेतेतिपतत्एतावानेव ४२ इतिश्रीषष्ठेपंचमः ५ षष्ठेदक्षात्मजाकन्याषष्ट्याप्रकीर्तिताः तत्र

तंतुकृंतनयन्नस्त्वमभद्रमचरःपुनः तस्माल्लोकेषुतेमूढनभवेद्भ्रमतःपदं ४१ श्रीशुक उवाच
प्रतिजग्राहतद्बाढंनारदःसाधुसंमतः एतावान्साधुवादोहितितिक्षेतेश्वरःस्वयं ४२
इतिश्रीभागवतेषष्ठस्कंधेपंचमोध्यायः ५ श्रीशुक उवाच ततःप्राचेतसोसिक्न्यामनुनीतः
स्वयंभुवा षष्टिंसंजनयामासदुहितॄःपितृवत्सलाः १ दशधर्मायकायेंदोर्द्विषट्
त्रिणवदत्तवान् भूतांगिरःकृशाश्वेभ्योद्वेद्वेतार्क्ष्यायचापराः २ नामधेयान्यमूषां
त्वंसापत्यानांचमेशृणु यासांप्रसूतिप्रसवैर्लोकाआपूरितास्त्रयः ३ भानुर्लंबाक
कुद्यामिर्विश्वासाध्यामरुत्वती वसुर्मुहूर्तासंकल्पाधर्मपत्न्यःसुतान्शृणु ४ भानु
स्तुदेवऋषभइंद्रसेनस्ततोनृप विद्योतआसील्लंबायास्ततश्चस्तनयित्नवः ५ क
कुभःसंकटस्तस्यकीकटस्तनयोयतः भुवोदुर्गाणिजामेयःस्वर्गोनंदिस्ततोभवे

त्वंशायुतोजातोविश्वरूपोदितेःसुतान् नारदात्पुत्राणांनाशमाशंकतोदुहितॄर्जनयामास
कायकश्यपायद्विषट्द्विगुणाःषट्द्वादशयामुनाः त्रयोदशेत्यर्थः इंदोःसोमायत्रिणवसप्तविं
शतिर्नक्षत्रनामानीःभ्राश्रायकश्यपायैवअपरावशिष्टाश्चतस्रः २ सापत्यानामपत्यसहिता
नांसमेमनःशृणु प्रसूतिःप्रसवैःपुत्रपौत्रादिभिः ४ ततोदेवऋषभात ५ यतःकीकटात्

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

22-A

तत्सुतः साध्यानोसुतः ५ वसोर्वसवस्तमुपलक्ष्याष्टौ तेन निर्देशः सेमनः ८ अभिमतिर्नामपत्नीतस्याहर्षाद
यः पुत्राः ११ सहस्यश्चायुस्य पुरोजवाश्च पुत्राः पुत्रः पुराणि १३ स्कंदस्य कृत्तिकासुतोग्नेः पुत्राः ष।

विश्वेदेवास्तु विश्वायाः प्रजां तान्प्रचक्षते साध्यागणान्सर्वप्ययाः सुयोसिद्धिस्तत
सुतः ७ मरुत्वान्मरुत्वत्यां मरुत्वन्तो बभूवतुः जयन्तो वासुदेवाश्च उपेन्द्र इति ये विदुः ८
मौहूर्तिका देवगणा मुहूर्तायाः प्रजज्ञिरे ये वै फलं प्रयच्छन्ति भूतानां स्वस्वकालजं ९
संकल्पायास्तु संकल्पः कामः संकल्पजः सुतः वसवोष्टौ वसोः पुत्रास्तेषां नामानि
मे शृणु द्रोणः प्राणो ध्रुवोर्कोग्निर्दोषो वसुर्विभावसुः द्रोणस्याभिमतेः पत्न्यां हर्ष
शोकभयादयः ११ प्राणस्योर्जस्वती भार्या सहस्यायुः पुरोजवः ध्रुवस्य भार्या धरणी
सुतं विविधाः पुरः १२ अर्कस्य वासना भार्याः पुत्रास्तर्षादयः स्मृताः अग्नेर्भार्या च
सौधीरा पुत्राश्च विणकादयः १३ स्कंदश्च कृत्तिकापुत्रो ये विशाखादयस्ततः दोषस्य
शर्वरीपुत्रः शिशुमारो हरेः कला १४ वसोरांगिरसीपुत्रो विश्वकर्मा कृतीपतिः ततो
मनश्चाक्षुषोभूद्विश्वे साध्याः मनोः सुताः १५ विभावसोरभूत्पुत्रो व्युष्टरोचिष्मातपः

गमातुरश्चेति अंग्रिभरितिचप्रसिद्धः ततः संधान १४ प्रकृतीपतिः शिल्पाचार्यः ततो विश्वकर्मणः
चाक्षुषो मनुरासीत् १५ उषाभार्या प्रथमा रात्र्यपान पंचयामो दिवसो जातः अत एव रात्रिस्त्रिया
मा प्रदोषप्रत्यूषयोर्दिवसस्यावयवत्वात् १६ ॥ राम ॥ राम ॥ राम

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

श्री भा पु टी २३

भूतस्य द्वे भार्ये तयोर्वंशमाह सरूपेति १७ महानित्येवं एकादश रुद्राः रुद्रस्य पार्षदाः प्रेतादयः अ-
न्ये स्वस्मात् जाताः १८ अङ्गिरसः स्वधा सती चेति द्वे भार्ये तयोर्वंशमाह प्रजापतेरिति स्वधा नाम प-
त्नी पितॄन् पुत्रत्वेऽकरोत् अथ सती चाथर्वाङ्गिरसं नाम वेदं १९ कृशाश्वस्यार्चिर्धिषणेति द्वे भार्ये

सरूपासूत भूतस्य भार्या रुद्रांश्च कोटिशः रैवतोऽजो भवो भीमो वाम उग्रो वृषाकपिः १७
अजैकपादहिर्बुध्न्यो बहुरूपो महानिति रुद्रस्य पार्षदाश्चान्ये घोराः प्रेतविनायकाः १८
प्रजापतेरङ्गिरसः स्वधा पत्नी पितॄनथ अथर्वाङ्गिरसं वेदं पुत्रत्वे चाकरोत्सती १९ कृशा-
श्वोऽर्चिषि भार्यायां धूम्रकेशमजीजनत् धिषणायां वेदशिरो देवलं वयुनं मनुं २० ता-
र्क्ष्यस्य विनता कद्रूः पतङ्गी यामिनीति पतङ्ग्यसूत पतगान्यामिनी शलभानथ २१
सुपर्णासूत गरुडं साक्षाद्यज्ञेशवाहनं सूर्यसूतमनूरुं च कद्रूर्नागाननेकशः २२ कृत्ति-
कादीनि नक्षत्राणीन्दोः पत्न्यस्तु भारत दक्षशापात्सोऽनपत्यस्तासु यक्ष्मग्रहार्दितः २३
पुनः प्रसाद्य तं सोमः कला लेभे क्षये दिताः शृणु नामानि लोकानां मातॄणां शंकरा-
णि च अथ कश्यपपत्नीनां यत्प्रसूतमिदं जगत् २४ अदितिर्दितिर्दनुः काष्ठा अरि-
ष्टा सुरसा इला मुनिः क्रोधवशा ताम्रा सुरभिः सरमा तिमिः २५ ॥ ॥

तयोर्वंशमाह कृशाश्व इति २० सुपर्णा विनता अनूरुं अरुणं २२ रोहिण्यामेव प्रेमातिशये-
नान्यासामनुपगमनात् कुपितस्य दक्षस्य शापात् यक्ष्मग्रहार्दितः क्षयरोगपीडितः सन् तास्वन-
पत्योऽभवत् तं दक्षं प्रसाद्य केवलं कला एव लेभे न त्वपत्यानि कथंभूताः क्षये कृष्णपक्षे दिताः खं-

२३

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

23A

अत्येतेनसमस्तमनवाद्यथापथ्यंभुक्त्वमेलतासंवेशनान्हृ तिमेरित्यादिना २० सारस्ताःस्वरसायाःपुत्राः २१ प्रा
धानिकान्व्याख्यान अष्टादशभ्यः शृणु २० वैश्वानरोदनोःपुत्रःस्वसुताः २१ कःप्रजापतिःकश्यपउप
तिमेर्यादोगणाआसनश्वापदाःसरमासुताः सुरभेर्महिषागावोयेचान्येद्विशफान्नृ
प २६ ताम्रायाःश्येनगृध्राद्यामुनेरप्सरसांगणाः दंदशूकादयःसर्पाराजन्क्रोधवशात्म
जाः २७ इलायाभूरुहाःसर्वेयातुधानाश्चसौरसाः अरिष्टायास्तुगंधर्वाःकाष्ठायाद्वि
शफेतराः २८ सुतादनोरेकषष्टिस्तेषांप्राधानिकान्शृणु द्विमूर्धाशंबरोरिष्टोहयग्री
वोविभावसुः २९ अयोमुखःशंकुशिराःस्वर्भानुःकपिलोरुणः पुलोमावृषपर्वा
चएकचक्रोनुतापनः ३० धूम्रकेशोविरूपाक्षोविप्रचित्तिश्चदुर्जयः स्वर्भानोःसुप्र
भांकन्यामुवाहनमुचिःकिल वृषपर्वणस्तुशर्मिष्ठांययातिर्नाहुषोबली वैश्वान
रसुतायाश्चचतस्रश्चारुदर्शनाः उपदानवीहयशिराःपुलोमाकालिकातथा ३२
उपदानवींहिरण्याक्षःक्रतुर्हयशिरांनृप पुलोमांकालिकांचद्वेवैश्वानरसुतेतु
कः ३३ उपयेमेथभगवान्कश्यपोब्रह्मचोदितः पुलोमाःकालकेयाश्चदानवायु
द्धशालिनः तयोःषष्टिसहस्राणियज्ञघ्नांस्तेपितुःपिता ३४ जघानस्वर्गतोराजन्नए
कइंद्रप्रियंकरः विप्रचित्तिःसिंहिकायांशतंचैकमजीजनत् राहुज्येष्ठंकेतुशतंग्र
हत्वंयउपागताः ३५ अथातःश्रूयतांवंशोयोदितेरनुपूर्वशः यत्रनारायणोदेवःस्वा
येमेदानवीपरिणयनेहेतुः ब्रह्मणाचोदितइति ३३ तयोःषष्टिसहस्राणिनिवातकवचाः
पुत्रानाताःस्वर्गतःसन् तेपितामहार्जुनोजघान ३४ राहुज्येष्ठायेषाम ३५ ॥ राम

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

24

श्री० पूस्वतत्पुत्रमवयत् प्रविवर्तमाना ३९ ततः विवस्वतः ४० चर्षणयः कृताकृतज्ञानवेत्तः पश्चान्निक
भाग० मेतेननिर्द्वंदाश्रुतेः अत्रेयेषुआत्मानमेधानविशेषेणमानवीजातिश्चोपकल्पिता तयाचक्रतिः
टी० पुरुषत्वेचावस्थिरामाप्नोति ४१ कृपितेहरमितिशेषः विवृतद्विजः प्रकटितदंतःसन् ४२ यद्यदा।
२४ विवस्वानर्यमापूषात्वष्टाथसविताभगः धाताविधातावरुणोमित्रःशक्रउरुक्रमः ३८ ।
विवस्वतः श्राद्धदेवंसंज्ञासूयतवैमनुं मिथुनंचमहाभागायमंदेवयमींतथा ३९ ।
सैवभूत्वाथवडवानासत्यौसुषुवेभुवि छायाशनैश्चरंलेभेसावर्णिंचमनुंततः क
न्यांचतपतींयावव्रेसंवरणंपतिं ४० अर्यम्णोमातृका पत्नीतयोश्चर्षणयःसुताः
यत्रवैमानुषीजातिर्ब्रह्मणाचोपकल्पिता ४१ पूषानपत्यःपिष्टादोभग्नदंतोऽभव
त्पुरा योसौदक्षायकुपितंजहासविवृतद्विजः ४२ त्वष्टुर्दैत्यात्मजाभार्यारचनाना
मकन्यका संनिवेशस्तयोर्जज्ञेविश्वरूपश्चवीर्यवान् ४३ तंवव्रिरेसुरगणादौहित्रं
द्विषतामपि विमतेनपरित्यक्तागुरुणांगिरसेनयत् ४४ इतिश्रीभागवतेषष्ठस्कंधे
षष्ठोध्यायः ६ राजोवाच कस्यहेतोःपरित्यक्ताआचार्येणात्मनःसुराः एतदाचक्ष्व
भगवन्शिष्याणामक्रमंगुरौ १ ॥

विमतेनअवस्तातेनबृहस्पतिनापरित्यक्ताः तदाद्विष
तोशत्रूणांभागिनेयमविरूपयोरोहित्येवृतवंतः ४५ इतिश्रीभागवतेषष्ठेषष्ठः ६ सप्तमेवि
श्वरूपोसोपौरोहित्येवृतःसुरैःगुरुणासंपरित्यक्तैःपौरोहित्यमथाकरोत् कस्यहेतोःकस्माद्धे
तोःआत्मनःशिष्याःसुरापरित्यक्ताः अक्रममपराधम् १ ॥ राम ॥

सदोपदासंप्राप्तंवाचस्पतिंनाभ्यनंदत् नतादृतवान् तदासखोंगिरसः ततोनिर्गत्यतूष्णींस्वगृहंययौ।
पृथ्वीवृत्तपद्यानामन्वयः अनादरहेतुमदंदर्शयितुंतद्विशिनष्टि त्रिभुवनैश्वर्यमदेनोल्लंघितःस
न्मार्गोयेनसः २ परिश्रितःपरिवृतः ४ आस्थानेसभायांतस्मिन्नध्यासनेसिंहासनेतदाश्रितः ५ दि
शुकउवाच इंद्रस्त्रिभुवनैश्वर्यमदोल्लंघितसत्पथः मरुद्भिर्वसुभीरुद्रैरादित्यैरृभुभिर्नृ
प १ विश्वेदेवैश्चसाध्यैश्चनासत्याभ्यांपरिश्रितः सिद्धचारणगंधर्वैर्मुनिभिर्ब्रह्मवादि
भिः २ विद्याधराप्सरोभिश्चकिंनरैःपतगोरगैः निषेव्यमाणोमघवान्स्तूयमानश्च =
भारत ३ उपगीयमानोललितमास्थानाध्यासनाश्रितः पांडुरेणातपत्रेणचंद्रमंडल =
चारुणा ४ युक्तश्चान्यैःपारमेष्ठ्यैश्चामरव्यजनादिभिः विराजमानःपौलोम्यासहार्धास
नयाभृशं ५ सयदापरमाचार्यंदेवानामात्मनश्चह नाभ्यनंदतसंप्राप्तंप्रत्युत्थानास
नादिभिः ६ वाचस्पतिंमुनिवरंसुरासुरनमस्कृतं नोच्चचालासनादिंद्रःपश्यन्नपिस
भागतं ७ ततोनिर्गत्यसहसाकविरांगिरसःप्रभुः आययौस्वगृहंतूष्णींविद्वान्श्री
मदविक्रियां ८ तर्ह्येवप्रतिबुद्ध्येंद्रोगुरुहेलनमात्मनः गर्हयामाससदसिस्वयमा
त्मानमात्मना ९ अहोबतमयासाधुकृतंवैदभ्रबुद्धिना यन्मयैश्वर्यमत्तेनगुरुःसद

पारमेष्ठ्यमहाराजचिह्नैःआसनस्यार्धेस्थितयापौलोम्यासहविराजमानःसन् उत्थानादिनाना
भ्यनंदत् ६ नचोच्चचालआसनएवस्थितोपिकिंचिच्चलितवान् ८ श्रीमदेनयाविक्रिया।
तांविद्वान्जानन् ८ प्रतिबुध्यअनुस्मृत्य ९ ममकृतंकर्मअहोअसाधुयस्मात् दभ्रबुद्धि
नाअल्पमतिनामयाकात्कृतः तिरस्कृतः १० ॥ राम ॥

रा

25

श्री भा ष टी २५

विबुधानांसात्विकानांदेवानामीश्वरोप्यहं ११ ननुसिंहासनस्थोराजानाभ्युत्थानेनकुर्यादितिहृदा
वदंति यद्यनिद्रास्थापिधिषणंआसनं १२ कुपथोदेशिनांतउपदेशानांतिकुपथदेष्टारः तेषांवचःअ
श्ममयः प्लवायथानयथामज्जनंतथावमनुमज्जंतितद्वत १४ अगाधागंभीराधिषणायस्यतं निश
कोगृध्येत्पंडितोलक्ष्मींत्रिविष्टपपतेरपि यथाहमासुरंभावंनीतोद्यविबुधेश्वरः १२ ये
पारमेष्ठ्यंधिषणमधितिष्ठन्नकिंचन प्रत्युत्तिष्ठेदितिब्रूयुर्धर्मंतेनपरंविदुः १३ तेषांकुप
थदेष्टॄणांपततांतमसिह्यधः येश्रद्दध्युर्वचस्तेवैमज्जंत्यश्मप्लवाइव १४ अथाहम
मराचार्यमगाधधिषणंद्विजं प्रसादयिष्येनिशठःशीर्ष्णातच्चरणंस्पृशन १५ एवं
चिंतयतस्तस्यमघोनोभगवान्गृहात बृहस्पतिर्गतोदृष्टांगतिमध्यात्ममायया १६
गुरोर्नाधिगतःसंज्ञांपरीक्षन्भगवान्स्वराट् ध्यायन्धियासुरैर्युक्तःशर्मनालभता
त्मनः १७ तच्छ्रुत्वैवासुराःसर्वआश्रित्यौशनसंमतं देवान्प्रत्युद्यमंचक्रुर्दुर्मदाआतता
यिनः १८ तैर्विसृष्टेषुभिस्तीक्ष्णैर्निर्भिन्नांगोरुबाहवः ब्रह्माणंशरणंजग्मुःसहेंद्रान
तकंधराः १९ तांस्तथाभ्यर्दितान्वीक्ष्यभगवानात्मभूरजः कृपयापरयादेवउवाचपरिसां
त्वयन २० ब्रह्मोवाच अहोबतसुरश्रेष्ठाह्यभद्रंवःकृतंमहत ब्रह्मिष्ठंब्राह्मणंदांतमैश्वर्या

ढःशठाद्रोहहीनःसन १२ अध्यात्ममायया १६ गुरोःसंज्ञांज्ञानोपायंपरीक्षमाणोपिनाधिगतः
अश्मप्लवाःसन १० आततायिनउद्यतास्त्राः १८ निर्भिन्नान्यंगानिशिरांसिउरवोबाहवश्चयेषां २० वो
युष्माकेंद्रेणकारणेनमहद्दुःखमभद्रंजातमाह ब्रह्मिष्ठमिति नाभ्यनंदतनाभिवंदितवंतः २१ ॥ राम २५

25A

परेभ्यःशत्रुभ्योवःपराभवइतियत् अयंतस्याग्रनयस्यान्यायस्यसेवेधीफलरूपमासीत् उक्तंचब्रह्म
णाकलमपुत्रभक्तविसिामहात्मनः आयांतेवीरसनोनिष्टत्सडःवियरिभ्यतेरलिहयमेवैवैरिणा।
हेतोरेयेषांतेभ्यः २२ गुरुतिरस्कारमतोगवैवापचयापचयकारणमित्यतुरहृष्टांतेनाह सवचन
नितिद्विषतःशत्रून् काव्यमार्गवेगुरुत्मेवाराध्यासेआपविताज उपचितत्वमेवास्याष्टदीरन्नरहस्मा
तस्याग्रमनयस्यासीत्परेभ्योवःपराभवः प्रक्षीणेभ्यःसर्वेभ्यःसमृद्धानोचयन्त्सराः २२
भवंतंद्विषतःपश्यप्रक्षीणान्गुर्वतिक्रमात् संप्रत्युपचितान्भूयःकाव्यमाराध्यभक्तितः २३
आष्टदीर्घग्निलयत्रमममापिस्मरगुरुदेवताः त्रिविष्टपेकिंगणंयत्समोत्र्चमेत्राभ्सगणामनुपिति
तार्याः नविप्रणाविदेगवीश्वराणांभवेत्सभद्राणीनेश्वराणां २४ नतिश्वरूपेभजता २५
पवित्रेतपवित्रेत्वाष्ट्रमथात्मवेते सभाजितोथानसविधास्यतेवोयदिच्छसिमध्यमता।
स्वकर्म २६ शुकः तएवमुदितोराजन्नब्रह्मणाविगतज्वराः अर्चयित्वाष्ट्रमपत्रन्यपुरि
वृत्तमेष्टमब्रुवन् २७ देवाऊचुः वयंतेनिश्चयःप्राप्ताःआश्रमंभद्रमस्तुते कामःसंपाद्यतेना।
तानांपितृणांसमयोवित्तः २८ पुत्राणांहियरोधर्मःपितृशुश्रूषणंसतां अपिपुत्रवतो
ब्रह्मन्किमुतब्रह्मचारिणः २९ आचार्योब्रह्मणोमूर्तिःपितामूर्तिःप्रजापतेः भ्राताम
रुत्वतेमूर्तिर्मातासाक्षात्क्षितेस्तनुः ३० दयायाभगिनीमूर्तिर्धर्मस्यात्मातिथिःस्वयं अ
ग्नेः ३१ यमोव्यामेत्र्येयथा पत्निपितितनार्थाः शिष्यायतःविप्रागोविदोगावश्वस्वराः मनुयाह।
कायेषांतेषामेवअभद्राणिनभवंति अन्येषांतुभवंति ३२ तत्रस्मात् अथश्रेनन्तरमेवभजन्तस्य
स्वकर्मअप्रमपत्तयाने ३३ अदितिउक्ता ३४ अतिथीनांपितृणांचप्रशंसार्थमाह आचार्य।

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

26

श्री॰
भाग॰
टी॰
२८

सदेशमाह । श्रुणीमहे इति ३२ तत्प्राध्यायतेकनिष्टस्यममाभिवंदनंकरिष्यथ नच्चगर्हितंतत्राह ।
नेति यथेष्टपुष्प्रेयाजननिमित्तेपविष्टानामभिवादनंनतनिंदेति किंच छंदोभ्यः मंत्रेभ्योन्यत्रव
यान्यष्टस्यकारणंनतन्मंत्रेषु अतोस्मभ्यं मंत्राद्दानेननतमवन्यष्टाभविष्यसि यद्वाछंदोभ्योन
पत्रवेदानविद्यापवयएवम्यष्टस्यकारणंनभवति किंतुवेदाएवकारणंतत्साम्येनवयः वेद
ज्ञत्वाचनतमेन्यष्टस्यर्थः ३३ निदिनमपीदंपुष्पयाज्ञाभंगभयेनकरिष्यामीत्याह सार्द्धेन वि

श्व ॥ वृणीमहे त्वोपाध्यायंब्रह्मिष्टंब्राह्मणंगुरुं यथांजसा विजेष्यामः सपत्नांस्तवतेजसा ॥ ३३ ॥
न गर्ह्यंति ह्यर्थेषु यविष्ठांघ्र्यभिवादनं छंदोभ्योन्यत्र न ब्रह्मन् वयो ज्यैष्ठ्यस्य कार
णं ॥ ३३ ॥ ऋषिरुवाच अभ्यर्थितः सुरगणैः पौरोहित्ये महातपाः स विश्वरूपस्तानाह
प्रसन्नः श्लक्ष्णया गिरा ॥ ३४ ॥ विश्वरूप उवाच विगर्हितं धर्मशीलैर्ब्रह्मवर्चउपव्य
यं कथं तु मद्विधो नाथा लोकेशैरभियाचितं प्रत्याख्यास्यति तच्छिष्यः स एव स्वा
र्थ उच्यते ॥ ३५ ॥ अकिंचनानां हि धनं शिलोंछनं तेनेह निर्वर्तितसाधुसत्क्रियः कथं
विगर्ह्यं नु करोम्यधीश्वराः पौरोधसं हृष्यति येन दुर्मतिः ॥ ३६ ॥ तथापि न प्रतिब्रूया
गुरुभिः प्रार्थितं कियत् भवतां प्रार्थितं सर्वं प्राणैरर्थैश्च साधये ॥ ३७ ॥ शुक उवाच ते

[illegible] २५ ॥

भ्य एवं प्रतिश्रुत्य विश्वरूपो महा

र्हितं पौरोहित्यं धर्मशीलैः अधर्महेतुत्वात् किंच ब्रह्मवर्चउपव्ययं ब्रह्मसिद्धस्य ब्रह्मवर्च
सस्य व्ययकरं अतस्तत्तु च मादृशा मा नेहतो साह कथं नु विनितेषां शिष्याणाहं स एव श्रुत्याख्या
नोभावएवहिशिष्यस्यार्थ उच्यते ३५ ननुपौरोहित्येधनपत्नलाभादुर्मेः सिद्ध्यंत अन्यथानिर्द्ध
नस्यकुतोधर्मः अतएवतेनलोकाराध्यतेतत्राह अकिंचनानां शिलोंछनेहि धनं हेचेश्वरास्त

पेत्तितकणिशोपादानंशिले हृदादौपतितश्रीसादेकपादानमुंछनं स्ह
स्सन्यहाश्रमतेनैःवर्तितासत्क्रियायेन ३६ कियदेतत्प्रार्थितमल्पमे
वअभ्यधिकमपिकरिष्यामीत्याह भवतामिति ३७ समापितंपरमो
मेन ३८

26-A

वेलव्याश्रीनारायणकवचात्मिकया ३९ अस्त्रैवमृ:दैत्यसेनाः ४० इति श्रीभावार्थे षष्ठे सप्तमः ७ अष्ट
मे विष्णुरूपस्य वर्म नारायणात्मकं इंद्राय प्राह येनेंद्रो गुप्तो दैत्यानथाजयत् त्रैलोक्याः सर्वा यत्नेन श्रियं
मंत्राभ्यां महाराज द्वादशाक्षराभ्यां कृतः सांगपुरश्चरणो येन नारायणमयं परं वर्म संनह्य

स्वां द्विषां श्रियं गुप्तामौशनसापि विद्यया आच्छिद्यादान्महेंद्राय वैष्णव्या विद्यया विभुः ३९
यया गुप्तः सहस्राक्षो जिग्येऽसुरचमूर्विभुः तां प्राह स महेंद्राय विश्वरूप उदारधीः ४० इति
श्रीभागवते षष्ठस्कंधे सप्तमोऽध्यायः ७ राजोवाच यया गुप्तः सहस्राक्षः सवाहान् रिपुसै
निकान् क्रीडन्निव विनिर्जित्य त्रिलोक्या बुभुजे श्रियं १ भगवंस्तन्ममाख्याहि वर्म ना
रायणात्मकं यथाततायिनः शत्रून्येन गुप्तोऽजयन्मृधे २ विश्वरूप उवाच धौतांघ्रि
पाणिराचम्य सपवित्र उदङ्मुखः कृतस्वांगकरन्यासो मंत्राभ्यां वाग्यतः शुचिः नाराय
णपरं वर्म संनह्येद्भय आगते दैवभूतात्मकर्मभ्यो नारायणमयः पुमान् ४ पादयोर्जा
नुनोरूर्वोरुदरे हृद्यथोरसि मुखे शिरस्यानुपूर्व्यादोंकारादीनि विन्यसेत् ५ ओं नमो
नारायणायेति विपर्ययमथापि वा करन्यासं ततः कुर्याद्द्वादशाक्षरविद्यया ६ प्र
णवादियकारांतमंगुल्यंगुष्ठपर्वसु न्यसेद्धृदय ओंकारं विकारमनु मूर्द्धनि ७ ॥

तं भीयात् ४ तत्राष्टाक्षरेण पादादायष्टांगेषु न्यासमाह पादयोरिति सार्द्धेन प्रणवसंपुटितमों
कारादेकैकमक्षरं विन्यसेत् ५ विपर्ययं पक्षांतरं मूर्द्धादिपादांतं वा विन्यसेत् उत्पत्तिन्या
संसंहारन्यासं वा कुर्यादित्यर्थः ६ द्वादशाक्षरन्यासमाह प्रणवादियकारांतमिति प्रणवसंपुटि
तमेकैकमक्षरं दक्षिणतर्जनीमारभ्य वामतर्जनीपर्यंतमंगुलीषु परिशिष्टमक्षरचतुष्टयमंगुष्ठयोः

27

श्री ना. ष. ८

मेत्रानस्यामस्मात् न्यसेदिति षकारणकंस्योर्विश्लेषणाडुत्तरांगिहृदयादिषु न्यसेत ८ मकारमस्त्रा
मुद्दिश्य ध्यात्वा तन्मकारमस्त्रयः अस्त्राय फडित्येवं दिग्बंधं विनिर्दिशेत ९ ध्यायेमां स्वरूपमात्माने
ध्यायेत षट्शक्तिभिः ऐश्वर्यादिभिर्भगशाह्वयाभिः विद्याचतेजस्तपश्च मन्नित्यस्यतेश्मेवस्य
माणोश्रीनारायणकवचाख्यषड्गुणाः अणिमाद्यष्टस्वयंयुक्तः १० पादसोगणाएववरुणस्यया
शालस्मात ११ अष्टवीवनेत्राजिमुखेसंग्रामोपत्र हस्त्राद्यदियोतेषु संकटस्थानेषु १२ अत्रसोप्रमि
षकारंवस्तुवामेणकारंशिलयादिशेत वकारंनेत्रयोर्युञ्ज्यात नकारंसर्वसंधिषु १
मकारमस्त्रमुद्दिश्य मंत्रमूर्तिर्भवेद्बुधः सविसर्गंफडंतेनसर्वदिक्षुविनिर्दिशेत ४ ॐ
विष्णवेनमइति १ आत्मानंपरमंध्यायेत ध्येयंषट्शक्तिभिर्युतं विद्यातेजस्तपोमूर्ति
मिमंमंत्रमुदाहरेत ११ ॐहरिर्विदध्यान्ममसर्वरक्षांन्यस्तांघ्रिपद्मःपतगेंद्रपृष्ठे दरारि
चर्मासिगदेषुचापपाशान्दधानोष्टगुणोष्टबाहुः १२ जलेषुमांरक्षतुमत्स्यमूर्तिर्या
दोगणेभ्योवरुणस्यपाशात स्थलेषुमायावटुवामनोव्यात्रिविक्रमः खेवतुविश्व
रूपः १ दुर्गेष्वटव्याजिमुखादिषुप्रभुः पायान्नृसिंहोसुरयूथपारिः विमुंचतोयस्यमहा
ट्टहासंदिशोविनेदुर्न्यपतंश्चगर्भाः १२ रक्षत्वसौमाध्वनियज्ञकल्पः स्वदंष्ट्रयोन्नीतधरोवरा
हः रामोद्रिकूटेष्वथविप्रवासेसलक्ष्मणोव्याद्भरताग्रजोस्मान १३ मामुग्रधर्मा
दखिलात्प्रमादान्नारायणःपातुनरश्चहासात दत्तस्त्वयोगादथयोगनाथःपायाद्गु
णेशःकपिलःकर्मबंधात १४ सनत्कुमारोवतुकामदेवाद्धयशीर्षामांपथिदेवहेलनात
देवर्षिवर्यःपुरुषार्चनांतरात्कूर्मोहरिर्मांनिरयादशेषात १५ धन्वंतरिर्भगवान्पात्वपथ्या
द्द्वंद्वाद्भयादृषभोनिर्जितात्मा यज्ञश्चलोकादवताज्जनांताद्बलोगणात्क्रोधवशादहींद्रः
...

27A

लोकान्तनापवादापनः ननु निमित्तो यान्तु उपचारात् तस्मात्कुलभद्रः प्रवर्त्तानन्दतोनादित्यपादेकृतोनानाका
लाः इतेनु क्रोधवशान्मयायोगात्मद्दोहीदः शेषः १९ कालमलमृतानकले कल्किः धर्मावनायधर्मारह
णायः अमहाजन्कृताः अवतारोयेन १७ दिनस्य षड्भागेषु क्रमेण प्रातरादिसंज्ञेषु रात्रेश्च प्रदोषादि
मेजषु रक्षार्थं न मां केशवादिविभिः श्रीभगवान्भगवानभिव्याप्य १८ त्रियामा तस्या हि त्रिविभूतिः।
श्रीमाधवः दोषाप्रदोषे अर्द्धरात्रे अर्द्धरात्रि पर्यन्ते काले निशीथे च एक एव पद्मनाभोऽवतु १९ अपर
पत्नैतरेभगवान्मा तपश्यात हृदाद्भ्यादृष भोनिर्जितान्मा यत्नश्च लोकादवतात्तु नोनातेव।
लोगाणाम क्रोधवशादहीदः १६ द्वपापनोभगवानपत्रोयाद् द्वन्द्वपापोऽण्णात्प्रमादात
कल्किः कलेकालमलाद्यपान धर्मावनायोरुकृतावतारः १७ मां केशवो गदया प्रातरे।
आदेविदस्माभगवतानवेणुः नारायणः प्राकृदात शार्ङ्गि मध्ये दिने विष्णुरदेइषपाणिः
देवापराह्णमधुहाउग्रधन्वा सायं त्रिधामा वतमाधवो मां दोषे हृषीकेश उताद्धरात्रे निशी
थ एको वतु पद्मनाभः १९ श्रीवत्सधामापररात्र ईशः प्रत्यूष ईशोऽसिधरो जनार्दनः दामोदरोऽव्या
दनुसंध्यं प्रभाते विश्वेश्वरो भगवान्कालमूर्तिः २० चक्रं युगान्तानलतिग्मनेमि भ्रमत्समं।
ताद्भगवत्प्रयुक्तं दन्दग्धि दन्दग्ध्यरिसैन्यमाशु कक्षं यथा वातसखो हुताशः २१ गदेशानि।
रात्रेईशः श्रीवत्सधामा वतु प्रत्यूषः ईशः श्रीजनार्दनः श्रीदामोदरः प्रभाते श्रीविश्वेश्वरः नुसंध्ये
युगान्तानलवन्निग्मातीव्रानेमिर्यस्य तच्चक्रं भगवतां प्रयुक्तं सत् अरिसैन्यं दन्दग्ध्यतिशयेन द
हतु तस्याधेयभावएव न ततः स्यात्याथ लीयमित्यर्थः यद्वा दंदग्धीति लोटमध्यमपुरुषः अच्युतमेव
मतेचक्रमिति सर्वमनज्ञा संबोध्य प्रार्थ्यते अतिशयेन दहतिकक्षं तृणं कक्षः २१ अशनिवत्स्पर्शो
येषां ते विस्फुलिङ्गा यस्याः संबोधनं हे गदे तव मजितस्य प्रियासि ग्रहस्य रक्षतस्य दासः अतस्त्वं मा दीनिषे

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

श्री भा० ष० टी० २८

हेदैरंदर्याव न न्यनेयातुधानादीनि द्रावय विप्रग्रहाः ब्रह्मराक्षसाः येन्ये च घोरदृष्टयस्तान् २२ तिग्मा।
धारासम्भिन्नगम पारग्रसिवरावज्रश्रेष्ठ ने मम अरिसैन्यं छिंधि छिंधि शातचंद्राकाराणि मंडलानि य
स्मिन्नद्दृश्यन्ते हे चर्मन् प्रद्योतोऽग्रवक्त्रो द्विषो च तेषां चक्षूंषि छादय यथा पापचक्षुषां चोग्रदृष्टीनां चक्षूंषि ह
रतपेभ्यामभयं प्रेहोभ्यः पापेभ्यः २४ श्रेयः प्रतीपकाः ईहव्याघातकाः २५ स्तोत्राणि बृहद्रथंतरा
दीनि सामानि तैः स्तोभ्यते स्तूयत इति स्तोत्रस्तोभः छंदोमयो वेदमूर्तिः स्वपार्षदविष्वक्सेनस्य नामानि त्यादि
वं त्वं यातुधानप्रमथप्रेतमातृपिशाचविप्रग्रहघोरदृष्टीन् दरेंद्र विद्रावय कृष्णपूरितो भी
मस्वनोऽरेर्हृदयानि कंपयन् २३ त्वं तिग्मधारासिवरारिसैन्यमीशप्रयुक्तो मम छिंधि छिंधि
चक्षूंषि चर्मन् शतचंद्र छादय द्विषामघोनां हर पापचक्षुषां २४ यन्नो भयं ग्रहेभ्योऽभूत्केतु
भ्यो नृभ्य एव वा सरीसृपेभ्यो दंष्ट्रिभ्यो भूतेभ्योंऽहोभ्य एव वा २५ सर्वाण्येतानि भगवन्नामरू
पास्त्रकीर्तनात् प्रयांतु संक्षयं सद्यो ये नः श्रेयःप्रतीपकाः २६ गरुडो भगवान् स्तोत्रस्तोभश्छंदो
मयः प्रभुः रक्षत्वशेषकृच्छ्रेभ्यो विष्वक्सेनः स्वनामभिः २७ सर्वापद्भ्यो हरेर्नामरूपयानायुधा
नि नः बुद्धींद्रियमनःप्राणान् पांतु पार्षदभूषणाः २८ यथा हि भगवानेव वस्तुतः सदसच्च
यत् सत्येनानेन नः सर्वे यांतु नाशमुपद्रवाः २९ यथैकात्म्यानुभावानां विकल्परहितः स्व
यं भूषणायुधलिंगाख्या धत्ते शक्तीः स्वमायया ३० तेनैव सत्यमानेन सर्वज्ञो भगवान् हरिः
क्तेः एकपद्यपाठे स्तोभः गीतिः श्रकाराणि स्तोत्रं स्तोममित्यादि सामगाथारथंतरादिकस्तोभः
नामानि रूपाणि च यानानि च वाहनानि आयुधानि च नोऽस्मान् पार्षदमुख्या भूषणानि पांतु २९
सद्रूपं सच्च मनसोऽनृतं यत्तत्सर्वं भगवान् ३१ ऐकात्म्यानुभावानां भूषणादीनां विकल्पाभेदः तद्रहि
तोपि ३० सत्यमानं न सत्यं तेन प्रमाणेन ३१ पुनरपि श्रीनृसिंह एव प्रार्थ्यते विदिक्ष्विति येन स्व

28A

दंशितः कवचितः ३३ सोऽपि साध्वसात् भयात् विमुच्यते ३४ तस्य न भयं न भवेदेव ३५ एतद्विद्याप्रभा
वमितिहासेनाह इमामिति सार्धैस्त्रिभिः मरुधन्वनि निरुदके देशे अनेन विद्यायाः देवतार्थरूपेण ता
नेऽदर्शिते ३६ यत्र द्विजस्य तस्य देहस्थानः तस्योपरि ३७ सद्यस्तत्क्षणमेव गगनात् न्यपतत् पादौ नेर

मघवन्निदमाख्यातं वर्मनारायणात्मकं विजेष्यसेंजसा येन दंशितोऽसुरयूथपान् ३३ एत
द्धारयमाणस्तु यं यं पश्यति चक्षुषा पदा वा संस्पृशेत्सद्यः साध्वसात्स विमुच्यते ३४ न कुत
श्चिद्भयं तस्य विद्यां धारयतो भवेत् राजदस्युग्रहादिभ्यो व्याघ्रादिभ्यश्च कर्हिचित् ३५ इमां
विद्यां पुरा कश्चित्कौशिको धारयन्द्विजः योगधारणया स्वांगं जहौ स मरुधन्वनि ३६ तस्यो
परि विमानेन गंधर्वपतिरेकदा ययौ चित्ररथः स्त्रीभिर्वृतो यत्र द्विजक्षयः ३७ गगनान्न्यप
तत्सद्यः सविमानो ह्यवाक्शिराः स वालखिल्यवचनादस्थीन्यादाय विस्मितः ३८ प्रा
स्य प्राचीसरस्वत्यां स्नात्वा धाम स्वमन्वगात् ३९ शुक उवाच य इदं शृणुयात्काले यो धारयति
चादृतः तं नमस्यन्ति भूतानि मुच्यते सर्वतो भयात् ४० एतां विद्यामधिगतो विश्वरूपाच्छतक्र
तुः त्रैलोक्यलक्ष्मीं बुभुजे विनिर्जित्य मृधेऽसुरान् ४१ इति श्रीभागवते षष्ठस्कंधे अष्टमोऽध्यायः
शुक उवाच तस्यासन्विश्वरूपस्य शिरांसि त्रीणि भारत सोमपीथं सुरापीथमन्नादमिति शुश्रुम

स्त्रीगणाभिः सह वालखिल्योपदेशात् स्वास्थीनि प्राप्य प्राच्यां विस्मितः स्वस्य धाम गंधर्वलोकं जगा
म ३९ अधिगतः प्राप्तः सन् ४१ इति श्रीभागवते षष्ठस्कंधे अष्टमः ८ नवमे विश्वरूपस्य हननं शक्रेण ।
कोपतः त्वष्टाचान्यादिनिहननेऽभीतेर्देवैः स्तुतिः सोमस्य पीथं पानं यस्मिन् एवं सुरापीथं अन्नम
त्तीत्यन्नादं स च विश्वरूपो वै त्वाष्ट्रः पुरोहितो देवानामासीदिति श्रुतिरनुसंधेया १ ॥ राम ॥

श्री भा॰ टी॰ ६

तस्यासन्विश्वरूपस्य शिरांसीति द्वाभ्यां प्रत्यक्षं प्रकटं यथा भवति तथा प्रवितनये देवेभ्यो हविर्यद्देवेभ्यो
हविर्भागं इत्यादयः यद्यपि यदस्मिन्नुच्चैरवदत् अत्र हेतुः यस्य पितरो देवाः स । असुरेभ्यस्तु परोक्षंतु
भागं दत्तोत देवा ह्यजमानो सावसुरान्प्रतिभागमवहत ३ तौवा एष तस्मथः तथापि जग्राह ४
सेवन्मत्सरतथैव स्थिता सेवत्सरान्ते भूतत्को पाभीतः सततमतानां मध्ये विशुद्धये लोकापवादपरिहा
राय महेश्वरोऽस्य मत्यादिभ्यस्तद्द्वंद्वे विभज्य ददौ ६ तरीयं च तत्रथभागं त्वात गते स्फुटः पूर्णे तेन वै
तायदित्वात प्रागेव तच्च भविष्यतीति हिं गृहिष्यामीत्येवं भाषावर्षे तेन जग्राह इत्यर्थः ७ इरिणम्
सेव वहिष्ठि देवेभ्यो भागं प्रत्यक्षमन्त्रके अवदद्यस्य पितरो देवाः स प्रश्रयेनेद २ सप्तवहि
इरो भागं परो तस्मसत्रात्याति यजमानो बृहद्भागमात्स्वे हवणानुगः ३ तदेव हे तत्रेतस्य पमा
लोकं स्वे प्रथरः प्राप्त ततत्सा भीतः तच्छीर्षाण्यपाच्छिनद्रुषा ४ सोमपीथं तु यत्तस्य शिर आसी
त्कपिञ्जलः कलविङ्कः सुरापीथमन्नादं यस्तु तित्तिरिः ५ ब्रह्महत्यामञ्जलिना जग्राह यद
पीश्वरः सेवत्सरान्ते तदघं भूतानां सविशुद्धये ६ भूम्यम्बुद्रुमयोषिद्भ्यश्चतुर्धा व्यभजद्धरिः
भूमिस्तुरीयं जग्राह खातपूरवरेण वै ७ ईर्मं ब्रह्महत्या यारूपं भूमो प्रदृश्यते तुर्यं छेदवि
रोहेण वरेण जगृहुर्द्रुमाः तेषां निर्यासरूपेण ब्रह्महत्या प्रदृश्यते ८ शश्वत्काम वरेणांहः
एवं ग्रन्तय देवा एवं प्रत्ययो नाधिष्ठितानि विषाप्यते ९ छेदं चेत्पुनर्विरोहः परोहो भवति तेन वरेण निर्यास
रूपेण ब्रह्महत्या चाहृष्टत्वात् निर्यासो न भक्ष्यः ८ शश्वत्कामवरेणयावत्स्वेगर्भाव्याघातेनैव सं
भोगवरेण च ततएव रजोदर्शनेन तस्मिगादिनवासं ९ द्रव्यभूयो वरेण यस्मिन्द्रव्यस्तेनदावायामि
प्राभवस्तु तस्य भूयसमा पिकोस्यादिति वरेण यद्वा सस्य वनिर्झरो हमादितानापस्तु वरेण इव्या
भयात्तिपाठं पक्षमे वार्थः यद्वा इत्स्य भयत्ता सोमिद्धिक इव तेन तेन वरेण अस्य विभागस्य विस्तरः ।

इंद्रस्य इंद्रेण शत्रुर्वेत्युत्पत्त्यैनतदा इंद्रः शत्रुर्विवर्द्धस्वेति अत्र चेंद्रशत्रुपदस्याद्युदात्तत्वात् बहुव्रीहिः पक्षे
न्याः शब्दप्रमितिस्तेन बहुव्रीहिलक्षणापत्त्या इंद्र एव तस्य शत्रुरभूत् तदुक्तं श्रुत्यापद्धतीत्वाद् इंद्रशत्रु
र्वर्द्धतेति तस्मादस्येंद्रः शत्रुरभवदिति यथा च शिक्षायामेवाहीनः स्वरतो वर्णतो वा मिथ्याप्रयुक्तो
न तमर्थमाह स वाग्वज्रो यजमानं हिनस्ति यथेंद्रशत्रुः स्वरतोऽपराधादिति ॥ अत्राहार्यपंचवक्ता
दतिकाण्डः ॥२॥ तदीत्थं विवृत्ता लोकाद्दशदिशो विवृद्ध इति पंचमेनान्वयः कथंभूतेन विषकलने
हतपुत्रा ततस्त्वष्ट्रा वह्नावेवाऽयं यशाऽत्रैव इंद्रशत्रो विवर्द्धस्व माचिरं जहि विद्विषं ॥१॥ अथा
न्वाहार्यपचनादुत्थितो घोरदर्शनः कृतांत इव लोकानां युगांतसमये यथा ॥२॥ विष्व
ग्विवर्द्धमानेन मिषुमात्रं दिने दिने दग्धशैलप्रतीकाशः संध्याभ्रानीकवर्चसः ॥३॥ तप्त
ताम्रशिखाश्मश्रुर्मध्याह्नार्कोग्रलोचनः ॥४॥ देदीप्यमाने त्रिशिखे शूलमारोप्य रोदसी
नृत्यन्नुन्नदयन् चालयंश्च पदा महीं ॥५॥ दरीगंभीरवक्त्रेण पिबता च नभस्तलं लि
हता जिह्वयाऽर्क्षाणि ग्रसता भुवनत्रयं ॥६॥ महता रौद्रदंष्ट्रेण जृंभमाणं मुहुर्मुहुः वित्र
स्तादुद्रुवुर्लोका वीक्ष्य सर्वे दिशो दश ॥७॥ येनावृता इमे लोकास्तपसा त्वाष्ट्रमूर्तिना स वै
वृत्र इति प्रोक्तः पापः परमदारुणः ॥८॥ तं निहंतुमभिप्रेत्य सगणा विबुधर्षभाः सैंसैंदि
ततः इषुविक्षेपमात्रं प्रतिदिनं वर्द्धमानेन दग्धशैलप्रतीकाशः कृष्णवर्णः संध्याभ्रानीकवद्वर्चो दीप्तिर्य
स्य सः ॥३॥ तप्तताम्रवत् शिखा श्मश्रूणि च यस्य मध्याह्नार्कवदुग्रलोचने यस्य ॥४॥ रोदसीमारोप्य
वेत्यर्थः ॥५॥ दरीवद्गंभीरेण वक्त्रेण मुहुर्मुहुर्जृंभमाणमित्यन्वयः कथंभूतेन नभस्तलं पिबता ऋ
क्षाणि जिह्वया लिहता भुवनत्रयं ग्रसता ॥६॥ महता विस्तीर्णेन रौद्रदंष्ट्रेण उपलक्षित ॥७॥ वृत्रनामनिर्वे

30

श्री भा प टी ६

ग्रलेनेजोयेषांग्रन्येच मेननयोग्मिलं त्रिभुवनस्य तेनेनव्याप्रत्वात् क्षोभिगमनात्संभवात्तन्नैवस्थिता
नष्टश्रुतिरित्यर्थः महाभयेपरित्राणेअन्यतोनभवेदिति हरिमेवप्रपद्यन्ते सदाःशरणान्तराः १९ वा
य्वादीनि पंचमहाभूतानि तेदैवताः त्रयोलोकास्तेषामधिपतयः ब्रह्मादयश्रुतमार्वीचीनाव
यंचसर्वेयस्मिन्नन्तकायकालायाद्विजेनतःसंतोवलंहराम अस्माविषयस्माद्विभेतिततःपरमे
श्वरादेवनोस्माकं अप्राणशरणशरणमस्तु २१ ततएवतस्य वृपारणे हेतुमाहुः अविस्मितेनिर
हंकारेणनहेतुलभ्यन्येवाकृतःयोतेरागादिस्पृह्येनचकृतः सेनेवलाभेनपरिपूर्णकामेनत्वा
ततस्तेविस्मिताःसर्वेविस्मायमानेजमः यन्येचमादिपुरुषस्यपतस्थुःसमाहिताः २०
देवाऊचुः वाय्वग्न्यपतिपस्त्रिलोकाब्रह्माद्यायवयमद्विजेनतः हराम यस्मैव
लिमेनकोसोविभेतियस्मात्शरणंनतोनः २१ अविस्मितेनपरिपूर्णकामेस्वेनैवलाभे
नसमेप्रशान्तेविनोपसर्पस्यपरोहिवालिशःस्वलांगुलेनातितितर्तिसिंधुं २२ यस्या
हस्पृहणेनजगतीसनाववमत्तययावधर्मतनारुद्धेन सएवनस्ताद्भयातेद्धातातस्त्वात्ता
त्रितानस्वारिचरोपितन्ने २३ पुरास्वयंभूरपिसंयमाभस्युदीर्णवातोमिरवैःकराले
कृतःसमेरुपाधिपरीक्षेदपश्वंएवंभंतेपरमेश्वरंविवायपरंश्र्यः शरणार्थंसपमस्येतिसहिवालिशोस्त्वः
पलोसास्वलांगुलेनपुच्छेनसमुद्रमतितर्तिअतितनंमिच्छतीत्यर्थः यद्याातेनसमुद्रतरणंनभ
वतिनयथानिरीश्वरोश्र्यणेनप्रमसनार्णवतरणेनभवतीतिभावः २२ महाभयेसएवारिकरः
तिरहमिन्याद्वयस्मतिहाम्भायस्यमहाश्रृंगेजगतीहथ्यिवीवसनावेवधामनसम्यकृतोयथावत
रुद्धेसंक्रटेनतात्मसएववारिचरामेत्स्यमूर्तिःनोस्मानस्ततःनूनेत्रातारद्धियतिं २३ सयमोमसिघ

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

30-A

किंत्वयंभगवानेवस्रष्टाःपालिताश्चबहुशःअतस्तमेवशरणंव्रजामेत्याहुः यएकइतित्रिभिः येनानेकशो
नाःसेमोविसृष्टास्तेनाम ननुस्वयमेवस्रष्टारःनास्मोयुष्माकमनुग्राहकोऽस्तितस्माद्दर्शनान्नत्राहुःअस्म
नेःपुनःपूर्वमेवानयोमितयाससमीहमानस्यापियस्यलिङ्गरूपंनपश्यामःतत्रहेतुःपृथगीशमा
त्मभिमानिनः देवादिषुउपेन्द्रपरशुराममत्स्यरामादितनुभिः कृतावतारःसनआत्मसात्कृत्वापाति
च २४ आत्मभूतेदैवतंकृतःविश्वंविश्वात्मकंतथापिविकारंवारयति अन्योविश्वात्मनोभेदेनपरंकार

यएकईशोनिजमाययानःससर्जयेनानुसृजामविश्वं वयंनयस्यापिपुरःसमीहतःपश्याम
लिङ्गंपृथगीशमानिनः २५ योनःसपत्नैर्भृशमर्द्यमानान्देवर्षितिर्यङ्नृषुनित्यएव कृ
तावतारस्तनुभिःस्वमाययाकृत्वात्मसात्पातियुगेयुगेच २६ तमेवदेवावयमात्मदैवतंप
रंप्रधानंपुरुषंविश्वमन्यं व्रजामसर्वेशरणंशरण्यंस्वानांसनोधास्यतिशंमहात्मा २७
श्रीशुकउवाच इतितेषांमहाराजसुराणामुपतिष्ठतां प्रतीच्यांदिश्यभूदाविःशंखचक्रग
दाधरः २८ आत्मतत्त्वेषोऽशोभिर्विनाश्रीवत्सकौस्तुभौ पर्युपासितमव्रिइणादेवरु
हेतलं २९ दृष्ट्वातमवनौसर्वईक्षणाह्लादविक्लवाः दंडवत्पतिताराजनशनैरुत्थायतुष्टु
वुः ३० देवाऊचुः नमस्तेयज्ञवीर्यायवयसेउतमेनमः नमस्तेह्यस्तचक्रायनमःसुपुरु

णे नतुप्रधानंपुरुषश्चविश्वस्यकारणंतत्राहुः प्रधानेपुरुषेचतदात्मकोऽपिसएवेत्यर्थः सएवनः
शंविधास्यति २७ प्रतीच्यांदिशिपश्चिमायांदिशिप्रथममाविरभूत पुनस्तुतेपुरोदृष्ट्वाईक्षणाह्लादेनविक्ल
ताःअवनौदंडवत्पतिताःसन्तःशनैरुत्थायपतस्तुष्टुवुरित्यन्वयः कंठभूतेश्रीवत्सकौस्तुभौविनासर्व
लैःषोडशाभिःपरितःसेविते उविरुद्दशारदेवरुहवदीतेषामयस्यते ३० यज्ञोवीर्यंस्वर्गादिफलंज

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

श्री भा ष टी ३१

ननु समग्रगुणान्नीतेरूपंविहायगुणोपाधिकेषस्तवीयत्वादिकिमितिचापेतेनचाहुः यतस्तवगुणास्वरूपस्येश
तेत्रिपत्त्रिगुणात्मिकांनातिरूपणागतेनापरमंपदंनिर्गुणास्वरूपंतेनिसर्गस्यार्वाचीनः इदानींतनः
हेयानः वेदितेनाद्वैतिश्रुतेः केवलंतस्मैतेनमालम्बितात्तरागोपयानिनमीयेतेहरेर्गुणाः इतिपद्यस्त्वं
तस्तद्योगपेनहेतुः भक्त्युद्रेकेणबहुधासेवायेनानुरूपंप्रपद्यवयति भगवत्रिन्यादिनापरमसंगा
लम्बहायम्बुम्भिंन आत्मयोगेनाशुगतेनयः समाधिस्तुनैकाग्र्येतेनपरिभावितः स्वशीलितः परिस्फु
टोयः पारमहंस्यधर्मोभगवद्भजनेनेनउद्घाटितेनतमोरूपकपाटंयस्मिन्नतत्सिद्धाभूतेचित्तेअपाहृत

यनेगतोनानिरूपणमीशानः परमंपदंनार्वाचीनोविसर्गस्यधातर्वेदितुमर्हति ३२ ॐ नम
स्तेभगवन्नारायणवासुदेवादिपुरुषमहा[illegible]पुरुषमहानुभावपरमंगलपरमकल्याण
परमकारुणिककेवलजगदाधारलोकैकनाथसर्वेश्वरलक्ष्मीनाथपरमहंसपरिव्राजकैः
परमेणात्मयोगसमाधिनापरिभावितपरिस्फुटपारमहंस्यधर्म्मेणोद्घाटिततमःकपाट
द्वारेचित्तेऽपावृतआत्मलोकेस्वयमुपलब्धनिजसुखानुभवोभवान् ३३ दुरवबोधइवत
वायंविहारयोगोयदशरणोऽशरीरइदमनवेक्षितास्मत्समवायआत्मनैवाविक्रियमाणेनस
गुणमगुणः सृजसिपासिहरसि ३४ अथतत्रभवान्किंदेवदत्तवदिहगुणविसर्गपतितः

प्रकटेआत्मलोकेप्रत्यग्रूपेस्वयमेवोपलब्धमभिव्यक्तंयन्निजसुखंतदनुभवरूपोभवान् ३३ ननुके
केवलानुभवरूपत्वेममसृष्ट्यादिकर्तृत्वेकोर्थस्तत्राहुः दुरवबोधइवतवायंविहारयोगः क्रीडायोगः यद्य
स्मात् अशरणोनिराश्रयः इदंविश्वमनवेक्षितोऽस्माकंसमवायोमेलनंसहाय्यंयेनसः ३४ दुर्ज्ञेयत्वो
त्तरमाहुः अथतत्रेति यथेहदेवदत्तोगृहादिनिर्माणेपरतन्त्रःस्वकृतंशुभाशुभयोःफलमुपादत्ते एवंभवा
न्वहास्वरूपाजीवरूपेणविसर्गपतितःसन्नुपादत्तेइति यद्वासमञ्जसमप्रपञ्चंतद्दर्शने विक्रियेयस्सम

राम ॥ ३६

31-A

नन्वेवं विरोधेन दुर्ज्ञेयत्वेन न कान्तत्वेऽपि दृष्टेन ज्ञानप्रकाशमाहुः नहीति विरुद्धमनन्त इति विरोधद्वयं भयेन विरु
द्धमित्यर्थः नन्वनेनानन्तदृष्टान्तेन तर्हि विकल्पा युज्यन्ते अत आह सर्वेषां तत्त्वादीनामाहुः भगवतीति अपरि
मितगुणगणत्वेऽस्मिन् ईश्वरे अनन्ते अर्वाग्भागस्य मतकां माहात्म्यं यस्य तस्मिन् विकल्प एवं वा
वेदान्ति वितर्कः किमत्र युक्तमिति विचार्यः सम्भवति तत्र प्रमाणाभासाः तर्कग्रहकाः कृतर्कोऽर्वा
चीनानां वस्तुस्वरूपस्पर्शिनो विकल्पादयः स एव प्रशान्ते प्रवृत्तेः कलिलमाकुलं अतः कारणमा
त्मपयोधरस्य दुराग्रहस्य निवारणे स्वानवसरे अगोचरे अनन्तब्रह्मात्मके मतः तत्र युक्तिरुच्यतामित्याहुः उपर
तो मायामयः मेसारोगयस्मिन् तस्मिन् केवले आत्ममायामध्यनिधाय योऽन्तर्थः कृतवान् इति संभ।

नहि विरोधद्वयं भगवत्यपरिगणितगुणगणेश्वरे अनवगाह्यमाहात्म्ये अर्वाचीनविक
ल्पवितर्कविचारप्रमाणाभासकुतर्कशास्त्रकलिलान्तःकरणाश्रयदुरवग्रहवादिनां
विवादानवसरे उपरतसमस्तमायामये केवल एवात्ममायामन्तर्धाय कोन्वर्थो दुर्घट इ
व भवति स्वरूपद्वयाभावात् ॥ ३६ ॥ समविषममतीनां मतमनुसरसि यथा रज्जुखण्डः सर्पादि
धियां ॥ ३७ ॥ स एव हि पुनः सर्ववस्तुनि वस्तुस्वरूपः सर्वेश्वरः सकलजगत्कारणकारणभूतः सर्व

वेत्तपारिकर्तृत्वादिवस्तुतो भेवन हि विरोधः स्यात् ननु तदस्तीत्याहुः स्वरूपद्वयाभावादिति ॥ ३६ ॥
अनुग्रहविग्रहादिकं तत्तन्निभेदेन तन्मायया प्रतिस्फुरतीत्याहुः समविषमा च मतिर्येषां
तेषां मतमभिप्रायं सर्पादिविषयाणीयधीयथा रज्जुखण्डस्य तथा भवति यद्वा तमेवाविरोधं पुन
प्रमभिनिभेदेन दर्शयति समविषमेति ॥ ३७ ॥ तदेवं विरोधं परिहृत्य निश्चितं परमार्थमाहुः स एव हि
नानारूपेण प्रतीतः वस्तुस्वरूपसद्रूपः सर्वेषां गुणानां विषयाणामाभासैः प्रकाशैः रूपलक्षितः ।
